केलन्-न्ती, [1]केलयन्-न्ती, चिकेलिषन्-न्ती ; —
केलिष्यन्-न्ती-ती, केलयिष्यन्-न्ती-ती, चिकेलिषिष्यन्-न्ती-ती ; —
[2]व्यतिकेलमानः, — चेकेल्यमानः, चेकेलिष्यमाणः ;
केल्-केलौ-केलः ; — — —
केलितम्-तः, केलितः, चिकेलिषितः, चेकेलितः-तवान् ;
केलः, [3]केलनः, केलः, चिकेलिषुः, चेकेलः ;
केलितव्यम्, केलयितव्यम्, चिकेलिषितव्यम्, चेकेलितव्यम् ;
[4]प्रनिकेलनीयम्, केलनीयम्, चिकेलिषणीयम्, चेकेलनीयम् ;
केल्यम्, केल्यम्, — चिकेलिष्यम्, चेकेल्यम् ;
ईषत्केलः-दुष्केलः-सुकेलः ; — —
केल्यमानः, केल्यमानः, चिकेलिष्यमाणः, चेकेल्यमानः ;
केलः, केलः, चिकेलिषः, चेकेलः ;
केलितुम्, केलयितुम्, चिकेलिषितुम्, चेकेलितुम् ;
[5]केला, केलना, चिकेलिषा, चेकेला ;
केलनम्, केलनम्, चिकेलिषणम्, चेकेलनम् ;
केलित्वा, केलयित्वा, चिकेलिषित्वा, चेकेलित्वा ;
प्रकेल्य, प्रकेल्य, प्रचिकेलिष्य, प्रचेकेल्य ;
केलम् २, केलित्वा २, } केलम् २, केलयित्वा २, } चिकेलिषम् २, चिकेलिषित्वा २, } चेकेलम् २ ; चेकेलित्वा २ ; }
[6]केलिः-[A]केली.

---

1. 'निगरणचलनार्थेभ्यश्च' (1-3-87) इति ण्यन्तात् परस्मैपदमेव ।
2. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति आत्मनेपदं, शानच् ।
3. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच् ।
4. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति पर्युदासात् नेः णत्वं न ।
5. 'गुरोश्च हलः' (3-3-103) इति अप्रत्ययः ।
6. 'इन्' (द. उ. 1-46) इतीन्प्रत्ययः । 'कृदिकारादक्तिनः' (ग. सू. 4-1-45) इति ङीष् वा ।

A. 'अवेलितानां प्रतिचेलधारिणाम् अकेलिलोले हृदि बद्धखेलनम् ।' धा. का. 1-69.